# Gajanana Stuti by Lobhasura

# ગજાનનસ્તુતિઃ લોભાસુરેણ પ્રોક્તા

## Document Information

Text title : Gajanana Stuti by Lobhasura

File name : gajAnanastutiHlobhAsureNaproktA.itx

Category : ganesha

Location : doc_ganesha

Transliterated by : Ajit Krishnan

Proofread by : Ajit Krishnan, PSA Easwaran

Description/comments : Mudgalapurana, Khanda 4, Adhyaya 42

Latest update : April 23, 2020

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

April 28, 2023

*sanskritdocuments.org*

# ગજાનનસ્તુતિઃ લોભાસુરેણ પ્રોક્તા

મુદ્ગલ ઉવાચ -
તં પ્રણમ્ય મહાદૈત્યો લોભઃ પરશું ઉત્તમમ્ ।
કૃતાઞ્જલિઃ પ્રતુષ્ટાવ ભયભીતઃ સમન્તતઃ ॥ ૩॥

લોભાસુર ઉવાચ ।
નમસ્તે શસ્ત્રરાજાય શસ્ત્રાણાં બ્રહ્મરૂપિણે ।
નાનાશસ્ત્રાણિ શસ્ત્રેશ! ત્વદાધારાણિ તે નમઃ ॥ ૪॥

પ્રલયાનલસઙ્કાશં સ્વરૂપં ધરતે નમઃ ।
અનન્તવીર્યયુક્તાય ભાસ્કરામિતતેજસે ॥ ૫॥

દૃશ્યાદૃશ્યમયાયૈવ સર્વદર્પહરાય તે ।
ધર્મસંસ્થાપનાર્થાય નાનારૂપધરાય ચ ॥ ૬॥

સાક્ષાદ્ગજાનનસ્યૈવ યદ્વીર્યં નિયતાત્મકમ્ ।
તદેવ ત્વં મહાશસ્ત્રં કિં તે સ્તૌમિ નમો નમઃ ॥ ૭॥

શરણાગતપાલાય સદા સ્વાનન્દસંસ્થિતઃ ।
રક્ષ માં ભયભીતં ભોઃ પરશો! તે નમો નમઃ ॥ ૮॥

નમસ્તે ગજવક્ત્રાય નાનાસિદ્ધિપ્રદાયિને ।
બુદ્ધિચાલકવેષાય બ્રહ્મણે વૈ નમો નમઃ ॥ ૧૪॥

હેરમ્બાય સદા સ્વાનન્દવાસિને મહાત્મને ।
પરાત્પરતરાયૈવ વિઘ્નેશાય નમો નમઃ ॥ ૧૫॥

સુરાસુરપ્રિયકર સુરાસુરમયાય તે ।
લોભયુક્તાન્ વિધર્મસ્થાન્નાશનાય નમો નમઃ ॥ ૧૬॥

દેવાનાં પાલકાયૈવ દૈત્યાનાં રક્ષકાય તે ।
સર્વેષાં દર્પહન્ત્રે વૈ ગણેશાય નમો નમઃ ॥ ૧૭॥

લમ્બોદરાય દેવેશ! દૈત્યેશ! મૂષકધ્વજ! ।
અનાદયે ચ સર્વેષાં આદિરૂપાય તે નમઃ ॥ ૧૮॥

આદિમધ્યાન્તહીનાયાદિમધ્યાન્તસ્વરૂપિણે ।
બ્રહ્મેશાય મહેશાનાં પાલકાય નમો નમઃ ॥ ૧૯॥

બ્રહ્મભ્યો બ્રહ્મદાત્રે ચ સદા શાન્તિધરાય તે ।
શાન્તીનાં શાન્તિરૂપાય નમો યોગાય વૈ નમઃ ॥ ૨૦॥

એકદન્તાય સર્વેશ! વક્રતુણ્ડાય તે નમઃ ।
મહોદરાય પૂર્ણાય પૂર્ણાનન્દાય તે નમઃ ॥ ૨૧॥

સર્વેષાં મૂલબીજાય માત્રે પિત્રે નમો નમઃ ।
જ્યેષ્ઠરાજાય જ્યેષ્ઠાનાં પાલકાય નમો નમઃ ॥ ૨૨॥

બીજરૂપં ગણાધીશ! જગતાં બ્રહ્મણાં ગજમ્ ।
ચિહ્નેન લભ્યસે તેન ગજાનન! નમોઽસ્તુ તે ॥ ૨૩॥

બોધહીનાય રૂપાય સદા સાઙ્ખ્યમયાય ચ ।
વિદેહાય નમસ્તુભ્યં પ્રત્યક્ષં રૂપધારિણે ॥ ૨૪॥

યં સ્તોતું ન સમર્થાશ્ચ વેદા યોગિશિવાદયઃ ।
તં કિં સ્તૌમિ ગણાધીશ! નમસ્તે વરદો ભવ ॥ ૨૫॥

ત્વદ્દર્શનજમાહાત્મ્યાત્ સંસ્તુતોઽસિ મહાપ્રભો ! ।
તેન મેઽભયદો ભૂત્વા રક્ષ દાસં વિશેષતઃ ॥ ૨૬॥

એવં સ્તુત્વા મહાલોભઃ પ્રણનામ ગજાનનમ્ ।
તમુવાચ દયાસિન્ધુર્ભક્તં ભક્તપ્રપાલકઃ ॥ ૨૭॥

ગજાનન ઉવાચ ।
ત્વયા કૃતમિદં સ્તોત્રં સર્વસિદ્ધિકરં ભવેત્ ।
પઠતઃ શ‍ૃણ્વતશ્ચૈવ લોભસ્તં નૈવ પીડયેત્ ॥ ૨૯॥

પુત્રપાઉત્રાદિસંયુક્તો ભુક્ત્વા ભોગાન્ મનેપ્સિતાન્ ।
અન્તે સ્વાનન્દલોકે સ બ્રહ્મભૂતો ભવૈષ્યતિ ॥ ૩૦॥

ઇતિ લોભાસુરેણ પ્રોક્તા ગજાનનસ્તુતિઃ સમાપ્તા । ૪.૪૨

Encoded by Ajit Krishnan

Proofread by Ajit Krishnan, PSA Easwaran

*Gajanana Stuti by Lobhasura*

pdf was typeset on April 28, 2023

Please send corrections to *sanskrit@cheerful.com*